/ १५६५-६

No. १५६५

Title चिन्तामणौ अनुमान खण्डः

Author ×

Extent १० Age ×

Subject न्यायवैशेषिकं

चिंतामणौ अनुमानखण्डः

१५७५

१० पत्रे

आनन्तर्याभिधानप्रयोजकजिज्ञासाजनकज्ञानविषययोरर्थः सङ्गतिः ज्ञायमाने कार्ये कारणे वा ज्ञाते किमस्य कारणं कार्यं वेति जिज्ञासा अतस्तयोर्द्वयोरपि सङ्गतित्वम् ननु सङ्गतं हि निरूप्यं न
त्वसङ्गतिः तन्निरूपणस्य प्रसङ्गे व्यर्थत्वे तावदर्थमेकवाक्यताप्रतिपत्तये शिष्याणामवधानाय च सङ्गतिप्रदर्शनं यत्र तु मान निरूपणं प्रतिजानीते प्रत्यक्षमित्यादि ननु किं नामैकवाक्यत्वम् अर्थैक्यादेकं
वाक्यं विभागे सति साकाङ्क्षं स्यादिति चेन्न अत्र विभागे सति साकाङ्क्षता नास्ति तस्मादेकानुपूर्विकत्वमेकवाक्यत्वमिति साधु एकानुपूर्विकत्वं हि एतदुच्चारणानन्तरमेतदुच्चारणम् ननु अर्थैक्यादेकं वाक्यमित्येतावता

चिन्ताम. अनु. १

ॐ श्रीगणेशाय नमः ॥ प्रत्यक्षोपजीवकत्वात्प्रत्यक्षानन्तरं बहुवादिसंमतत्वादुपमानात्प्रागनुमानं निरूप्यते तत्र व्याप्तिविशिष्टपक्षधर्मताज्ञा
नजन्यं ज्ञानमनुमितिः तत्करणमनुमानम् तच्च लिङ्गपरामर्शो न तु परामृश्यमानं लिङ्गमिति वक्ष्यते अथानुमानं न प्रमाणम् योग्योपाधीनां
योग्यानुपलम्भादभावनिश्चयेऽप्ययोग्योपाधिशङ्कया व्यभिचारसंशयात् शतशः सहचरितयोरपि व्यभिचारोपलब्धेश्च लोके धूमादिदर्शना
नन्तरं वह्न्यादिव्यवहारस्तु सम्भावनामात्रात् संवादेन च प्रामाण्याभिमानादिति न अप्रमाणसाधर्म्येण प्रामाण्यसाधने हेतुसाधर्म्यस्याऽनुमान
सन्देहविपर्ययोः
त्वात् एतद्वाक्यस्य सन्दिग्धविपर्यस्तान्यतरं प्रत्यर्थवत्त्वात् तयोश्च परकीययोरप्रत्यक्षत्वात् अनुमानमप्रमाणमिति वाक्यस्य प्रामाण्याप्रामा
ण्ययोर्व्याहतत्वाच्च अपि चानुमानस्याप्रामाण्ये प्रत्यक्षस्याप्यप्रामाण्यापत्तिः प्रामाण्यस्यानुमेयत्वात् स्वतःप्रामाण्ये हेतुसंशयानुपपत्तेः व्या
प्तिग्रहोपायश्च वक्ष्यते ननु अनुमितिहेतुव्याप्तिज्ञाने का व्याप्तिः न तावदव्यभिचरितत्वं तद्धि न साध्याभाववदवृत्तित्वं साध्यवद्भिन्नसाध्या
भाववदवृत्तित्वं वा साध्यवत्प्रतियोगिकान्योन्याभावासामानाधिकरण्यं सकलसाध्याभाववन्निष्ठाभावप्रतियोगित्वं वा साध्यवदन्यावृ
त्तित्वं वा केवलान्वयिन्यभावात् नापि साध्यासामानाधिकरण्यानधिकरणत्वं साध्यवैयधिकरण्यानधिकरणत्वं वा तदुभयमपि साध्यान
केवलान्वयिनि
धिकरणानधिकरणत्वं तच्च तत्र यत्किञ्चित्साध्यानधिकरणाधिकरणे धूमे चाप्रसिद्धम् अथेदं वाच्यं ज्ञेयत्वादित्यत्र समवायितया वाच्य
त्वाभावो घटत्वे प्रसिद्धः व्यधिकरणधर्मावच्छिन्नप्रतियोगिताकाभावस्य केवलान्वयित्वात् नैवं घटे व्यभिचारः साध्यत्वावच्छेद
कावच्छिन्नप्रतियोगिताकाभाववद्वृत्तित्वं हि व्यभिचारः न च वाच्यत्वाभाववांस्तादृशो घट इति चेन्न हि तादृशसाध्याभावासामानाधिकरण्यं व्या

अनुमाने प्रामाण्याप्रामा
ण्ययोरनुमानेकसिद्धत्वात् =

तद्विभागो वा विभजनं तदु
पावो विभजनं तु अनयोर
एकवाक्यत्वं स्यात् अतो
विभागे सति साकाङ्क्ष
मित्युक्तम् ननु विभागे
साकाङ्क्षमित्येवास्तु न
ह्यसौ न तेस दर्शनं कुत्रापि
दृश्यमानधारया संवेदक
त्वया सिन्तस्मिन्सीदर
तज्ज्ञाप्यैकवाक्यत्वं स्यात्
एकवाक्यत्वमेकार्थप्रति
पादकत्वम् =

समवायेन वाच्यत्वाभा
वति घटे १ यत्सद्वृत्ति
त्वात्

हेतुसत्त्वे साध्यासत्त्वं व्यभिचारः =

साध्यतावच्छेदकवाच्यत्व
त्वावच्छिन्नप्रतियोगिताकः

प्रतियोग्यवृत्तिव्यधिकरणधर्मावच्छिन्नप्रतियोगिताकाभावानङ्गीकारे कथं शशशृङ्गं नास्तीत्यत्र शशीयत्वरूपव्यधिकरणधर्मावच्छिन्नप्रतियोगिताकः शृङ्गाभावः प्रतीयते इत्यत आह

साध्यतावच्छेदकावच्छिन्न

तादृशसाध्याभाववत्सामानाधिकरण्यं व्याप्तिः तथा चाप्रसिद्धिः प्रतियोग्यवृत्तिश्च धर्मो न प्रतियोगितावच्छेदकः न हि शिरस्त्वेन तस्याभावधीकारणत्वात्
अन्यथा निर्विकल्पकादपि घटो नास्तीति प्रतीत्यापत्तेः गवि शशशृङ्गं नास्तीति प्रतीतेरसिद्धेः शशशृङ्गं नास्तीति च शशीयशृङ्गाभाववदित्यर्थः अथ
साध्यासामानाधिकरण्यानधिकरणत्वे सति साधिकरणत्वं व्याप्तिः केवलान्वयिनि साध्यासामानाधिकरण्यं निरधिकरणे आकाशादावप्रसिद्धमिति
चेन्न साध्यासामानाधिकरण्यं हि न साध्यानधिकरणाधिकरणत्वं साध्याधिकरणानधिकरणत्वं वा केवलान्वयिनि यत्किञ्चित्साध्याधिकरणान-
धिकरणे धूमे चाव्याप्तेः नापि स्वसमानाधिकरणात्यन्ताभावाप्रतियोगिसाध्यसामानाधिकरण्यं पर्वतीयवह्नेर्महानसीयधूमसमानाधिकरणात्य-
न्ताभावप्रतियोगित्वात् द्रव्यत्वादेरव्याप्यवृत्तिसंयोगव्याप्यतापत्तेश्च न च प्रतियोगिविरोधित्वं व्याप्यवृत्तित्वं वा अत्यन्ताभावविशेषणं संयोगादेः साध्ये सम्ब-
न्धेनैकान्तिकत्वाभावप्रसङ्गात् न हि प्रतियोगिविरोधिसंयोगादेरपरोऽत्यन्ताभावोऽस्ति अधिकरणभेदेनाभावभेदानङ्गीकारात् नापि साधनवन्नि-
ष्ठान्योन्याभावाप्रतियोगिसाध्यवत्कत्वं व्याप्तिः मूले वृक्षः कपिसंयोगी नाग्रे इत्यबाधितप्रतीतेस्तदन्योन्याभावस्याप्रतियोगिसत्त्वात् न चैवं भेदाभेदः अव-
च्छेदकभेदेन तत्स्वीकारोपगमात् साधनवन्निष्ठान्योन्याभावाप्रतियोगिसाध्यवत्त्वस्य तु लिङ्गसाध्ययोर्व्याप्यव्यापकभावानिरूपणात् साध्यसाधनयोर्व्या-
प्तिनिरूपणात् वह्निमत्पर्वतस्य धूमवन्महानसनिष्ठान्योन्याभावप्रतियोगित्वाच्च विशेषाभावकूटादेवाभाववदारोपपत्तेः सामान्याभावेऽमा-
नाभावात् नापि साधनसमानाधिकरणयावद्धर्मनिरूपितवैयधिकरण्यानधिकरणसाध्यसामानाधिकरण्यं साधनसमानाधिकरणस्य प्र-
मेयत्वादेर्वैयधिकरण्याप्रसिद्धेः महानसादौ समवायितया वह्नेर्वह्निमतो वात्यन्ताभावान्योन्याभावयोः सत्त्वाद्धूमादावव्याप्तेर्लक्षणाभावाच्च ।
अथानौपाधिकसम्बन्धो व्याप्तिः उपाधिश्च साध्यव्यापकत्वे साधनाव्यापकः व्यापकत्वं च तद्वन्निष्ठात्यन्ताभावाप्रतियोगित्वं व्यभिचारे चावश्यमुपा-
धिः प्रतियोगित्वेन विरोधित्वं सहानवस्थाननियमलक्षणम् गोत्वाश्वत्वयोरपि तथात्वात् अन्योन्याभावप्रतियोग्यन्यसत्त्वाच्च किंत्वधिकरण

हेतुसमानाधिकरणात्यन्ताभावः प्रतियोगिविरोध्यत्यन्ताभावः ... प्रतियोगितावच्छेदकावच्छिन्नसामानाधिकरण्यं

चिन्ता·म·
ग्र·मा·
२
2

एतद्रूपवान् एत
द्दशात् =

भावयोः स्वरूपविशेषः सम्बन्धः तथा प्रतियोग्यनुयोगित्वमपि अभावविरहात्मत्वं वेति चेन्न यत्किञ्चित्साध्यव्यापकसाधनाव्यापकधर्मनिषेधेनाप्र-
मादेः प्रकृतसाध्यव्यापकसाधनाव्यापकधर्मस्याप्रसिद्धौ सिद्धिभ्रान्तं निषेद्धुमशक्यः यावत्साध्यव्यापके प्रमेयत्वादौ साधनाव्यापकत्वं यावत्साधना-
व्यापके वह्न्यादौ साध्यव्यापकत्वं निषिध्यत इति चेन्न व्यधिकरणत्वात् यावत्साधनाव्यापकमव्यापकं यत्साध्यस्य यावत्साध्यव्यापकं व्यापकं वा-
यस्य साधनस्य तत्त्वं तदिति चेन्न सोपाधेरपि तथात्वात् तथाहि साधनस्य वह्नेरव्यापकं यावदार्द्रेन्धनं तत्प्रत्येकमव्यापकं साध्यधूमस्य द्वितीये सा-
ध्यधूमस्य व्यापकं यावदार्द्रेन्धनं तद्व्यापकं महानसीयवह्नेः नापि साध्यं यावद्व्यभिचारितद्व्यभिचारित्वमनौपाधिकत्वं साध्याव्यभिचारित्वस्यैवागम-
कत्वसंभवात् तच्च दूषितम् नापि कार्त्स्न्येन सम्बन्धो व्याप्तिः एकव्यक्तिके तदभावात् नानाव्यक्तिकेऽपि सकलधूमसम्बन्धस्य प्रत्येकं वह्नावसंभवात्
अत एव न कृत्स्नेन साध्येन सम्बन्धो व्याप्तिः विषमव्याप्तिके तदभावाच्च न च यावत्साधनाश्रयाश्रितसाध्यसम्बन्धः साधनाश्रये महानसादौ सकलेप्र-
त्येकं वह्नेराश्रितत्वात् नापि साधनसमानाधिकरणयावद्धर्मसमानाधिकरणसाध्यसामानाधिकरण्यं यावत्तद्धर्मसामानाधिकरण्यं वह्नि यावत्तद्ध-
र्माधिकरणाधिकरणत्वं तच्चाप्रसिद्धं साधनसमानाधिकरणसकलमहानसत्वाद्यधिकरणाप्रतीतेः नापि स्वाभाविकः सम्बन्धो व्याप्तिः स्वभावज-
न्यत्वदाश्रितत्वादौ चाव्याप्त्यतिव्याप्तेः नाप्यविनाभावः केवलान्वयिन्यभावात् अथ सम्बन्धमात्रं व्याप्तिः व्यभिचारिसम्बन्धस्य केनचित्सह व्याप्तित्वात्
धूमादिव्याप्तिस्तु विशिष्टैव निर्वक्तव्येति तन्न लिङ्गपरामर्शविषयव्याप्तिस्वरूपनिरूपणप्रस्तावे लक्षणाभिधानस्यार्थान्तरत्वात् न च सम्बन्धमात्रं तथा
तद्बाधादनुमित्यनुपपत्तेः नापि व्याप्तिपदप्रवृत्तिनिमित्तमिदं सम्बन्धत्वेनैव व्याप्तिपदाप्रयोगात् केवलान्वयिनि केवलान्वयिसाध्यसम्बन्धो व्यति-
रेकिणि साध्यवदन्यावृत्तित्वं व्याप्तिः एतयोरनुमितिविशेषेणाजनकत्वम् अनुमितिमात्रेणैतद्धर्मतैव प्रयोजिका न चातिप्रसङ्गः विशेषसामग्रीस- २
हिताया एव सामान्यसामग्र्या जनकत्वनियमादिति केचित्तदपि न साध्यवदन्यावृत्तित्वस्य धूमेऽसत्त्वात् वह्निमत्पर्वतान्यस्मिन्धूमसम्बन्धत्वात् न च

सकलसाध्यवद्व्यावृत्तित्वं वह्निमत्तां प्रत्येकं तत्त्वात् सर्वत्र लक्षणे साध्यत्वसाधनत्वतदभिमतत्वानां व्याप्तिनिरूप्यत्वेनान्योन्याश्रयः साध्यत्वं हि न सिद्धिकर्म-
त्वं किं साधयितव्यविषयत्वं वा महानसीयवह्नौ तदभावात् न च सामान्यतो व्याप्यवगमोऽस्त्येव परस्य कथमन्यथा हेतुत्वेनासाधकत्वं साधयेदिति वाच्यम्
स्वार्थानुमानोपयोगिव्याप्तिस्वरूपनिरूपणं विना कथायामप्रवेशादिति अत्रोच्यते प्रतियोग्यसमानाधिकरणयत्समानाधिकरणात्यन्ताभावप्रतियो- सिद्धान्तलक्षणम्
गितावच्छेदकावच्छिन्नं यन्न भवति तेन समं तस्य सामानाधिकरण्यं व्याप्तिः अन्यनिष्ठवह्नेर्धूमवत्यवर्तमानात्यन्ताभावप्रतियोगित्वेऽपि तत्प्रतियोगितान
वह्नित्वेनावच्छिद्यते धूमवति वह्निर्नास्तीत्यप्रतीतेः सामान्यावच्छिन्नप्रतियोगिकस्याभावः पृथगेव अन्यथा सकलप्रसिद्धरूपाभावेऽप्रसिद्धरूपवद-
त्वेऽप्यवगतेर्वायो रूपं न वा वायू रूपवान्न वेति संशयो न स्यात् विशेषाभावकूटस्यैव निश्चितत्वात् यद्वा प्रतियोगिव्यधिकरणस्वसमानाधिकर-
णात्यन्ताभावप्रतियोगितासामानाधिकरण्यं यत्समानाधिकरणान्योन्याभावप्रतियोगियद्धर्मवत् तेन समं तस्य सामानाधिकरण्यं वा स्वसमा-
नाधिकरणान्योन्याभावप्रतियोगियद्धैकत्वं वा अन्यथा हि वह्नितद्वतोरन्यद्वृत्ति धूमवन्निष्ठात्यन्ताभावान्योन्याभावप्रतियोगित्वाद्व्यधिकरणवह्नि-
मयोर्नव्याप्तिः किन्तु तत्र धूमसमानाधिकरणतद्वह्निना न चैवं धूममात्रे नु व्याप्तिरिति वाच्यम् सर्वधूमव्यक्तेस्तथात्वेन धूममात्रस्य व्याप्यत्वात् धू-
मसम्बन्धिवह्नित्वस्य एव गुणप्रत्ययत्वे विनष्टयोऽव्याप्तिरेव कर्मत्वे च संयोगात्यन्ताभावः प्रतियोग्यसमानाधिकरणः यद्वा प्रतियोगिवैय-
धिकरण्यावच्छेदकावच्छिन्नत्वमत्यन्ताभावविशेषणे कर्मत्वे च संयोगात्यन्ताभावस्य प्रतियोगिवैयधिकरण्यावच्छेदकावच्छिन्नत्वमेव न चान्यो-
न्याभावस्याव्याप्यवृत्तित्वे अभेदस्याबाधितप्रत्यभिज्ञानात् व्याप्यव्यापकभावज्ञानेऽपि वस्तुसन्तत्यत्वेनाज्ञायमानस्य सम्बन्धत्वेनैवभासमानस्य
प्रयोज्यत्वं न चैवमननुगमो दोषाय कस्यचिद्व्याप्तिरित्यननुगतस्यैव लक्ष्यत्वात् अथ धूमवति वह्निकूटो नास्ति धूमवान् वह्निमद्भेदेनवतीति प्रती-
तेः व्यासज्यप्रतियोगिकौ वह्निवह्निमतोरत्यन्ताभावान्योन्याभावौ विद्येते इति कथमेतल्लक्षणयोरतिव्याप्तिरिति चेन्न तादृशाभावानभ्युपगमात् अभ्युपगमे वा
तदुभयप्रतियोगिन वह्निवह्निमत्तोः अपि वा नोपाधिकत्वव्याप्तिः तच्च यावत्स्वसमानाधिकरणात्यन्ताभावप्रतियोगितावच्छेदकावच्छिन्नं यन्न भवति

एकसत्वेऽपि द्वयं नास्ती-
ति प्रतीतेः ॥

धूममात्रस्य वह्निसम्बन्धित्वात् वह्नेस्तु धूमसम्बन्धेन वह्नित्वमवच्छेदकं ४

विन्नाम· ग्र·मा·
२ 3

अवच्छेद्यान्न्यूनातिरिक्तादेशवर्त्तित्वमवच्छेदकम् अयं संयोगी सत्त्वात् इति व्यभिचारी

योगिकात्यन्ताभावसमानाधिकरणं यन्न्सामानाधिकरण्यम् नह्येवंसोपाधिः तत्र साधनसमानाधिकरणात्यन्ताभावप्रतियोगिन उपाधेरीन्ध-
नवत्वादेर्यात्यन्ताभावस्तेन समं साध्यस्य धूमादेः सामानाधिकरण्याभावात् उपाधेः साध्याव्यापकत्वात् एतेदेव यावत्स्वाव्यभिचारिव्यभिचारिसाध्यसामा-
नाधिकरण्यमनौपाधिकत्वमितिनिगीयते यद्वा यावद्यसमानाधिकरणात्यन्ताभावाप्रतियोगिप्रतियोगिकात्यन्ताभावासामानाधिकरण्यं यस्य तस्य
तदेवानौपाधिकत्वं सोपाधिस्तु साध्यवन्निष्ठात्यन्ताभावाप्रतियोगिन उपाधेर्यात्यन्ताभावस्तेन समं हेतोः सामानाधिकरण्यम् उपाधेः साधनाव्याप-
कत्वात् यद्वा यत्सम्बन्धितावच्छेदकरूपवत्त्वं यस्य तस्य साव्याप्तिः तथा हि धूमस्य वह्निसम्बन्धितावच्छेदकम् धूमः सम्बन्धितिनिगतत्वात् न ह्य-
तिप्रसक्तमवच्छेदकं संयोगादौ तथात्वादर्शनात् किं त्वस्त्रावाईन्धनप्रभववह्नित्वं धूमसम्बन्धितावच्छेदकं तादृशं च व्याप्यमेव अथवा यत्सामा-
नाधिकरण्यावच्छेदकावच्छिन्नं यस्य स्वरूपं तत्र तस्य व्याप्यं वह्निसामानाधिकरण्यं हि धूमे धूमत्वेनावच्छिद्यते सोपाधौ तत्पादिना अत एव साधनता-
वच्छेदकभिन्नेन येन साधनस्याभिमतेसाध्यसम्बन्धोवच्छिद्यते स एव तत्र साधने विशेषणमुपाधिरिति वदन्ति अत एव च तत्र साधनाव्यापकत्वे सति साध-
नावच्छिन्नसाध्यव्यापकत्वं लक्षणं ध्रुवम् व्यभिचारिणि साधने एकत्र साध्यतदभावयोर्विरोधेनावच्छेदकभेदं विना तदुभयभेदाभावादवश्यं साध्यस-
म्बन्धितावच्छेदकमस्ति तदेव च साधनावच्छिन्नसाध्यव्यापकं तत्रोपाधिः अत एव व्यभिचारे चावश्यमुपाधिरिति संगच्छते अन्यथा व्यभिचारादेव तस्याग-
मकत्वे व्यभिचारित्वेन न तदनुमानप्रयोजकत्वात् अत एव तस्य साध्यसम्बन्धितावच्छेदकरूपलक्षणव्याप्तिः साधनाभिमते च कास्तीति स्फटिके ज-
पाकुसुमवदुपाधिरसावुच्यते साधनावच्छिन्नसाध्यव्यापकत्वे सति साधनाव्यापकत्वम् विषमव्याप्तस्त्वनोपाधिपदवाच्यः प्रवृत्तिनिमित्ताभावात् दू-
षकता वास्य व्यभिचारोन्नायकतया न च व्यभिचारोन्नायकत्वमेवोपाधित्वम् अप्रयोजकसाध्यव्यापकव्यभिचारिणोप्युपाधितापत्तेरिति ॥ सेयं
व्याप्तिर्भूयोदर्शनगम्या दर्शनानां प्रत्येकमहेतुत्वात् आशुविनाशिनां क्रमिकाणां मेलकाभावात् न च तावद्दर्शनजन्यसंस्कारा इन्द्रियसहकारितया व्या- २
प्तिज्ञाने हेतवः प्रत्यभिज्ञायामिन्द्रियस्य तथात्वकल्पनादिति वाच्यम् समानविषये स्मरणे प्रत्यभिज्ञाने च संस्कारो हेतुः अतः कथं सहचारविषयकसं-

शह ञ्रुदिकमर्त्लं हि
तत्त्वम्यापितानः १

कारेण व्याप्तिज्ञानं जन्येत अन्यथातिप्रसङ्गः किं च सहचारभूयोदर्शनं भूयस्त्वस्यानेकदर्शनं वा भूयसां दर्शनं वा भूयांसि वा दर्शनानि न त्वाद्य एकत्र रूपरस
योर्द्वय व्यभिचारे तयोर्व्याप्तिग्रहात् एकत्रैव धारावाहिके तद्धीप्रसङ्गात् भूयस्त्वस्य त्रित्वचतुष्ट्वादित्वेनाननुगमाच्च अपि च पार्थिवत्वलोहलेख्यत्वादौ शत
शोऽपि भूयोदर्शनेऽपि व्याप्त्यग्रहात् तर्कसहकृतं तथेति चेत् तर्हि सहचारदर्शनव्यभिचारादर्शनसहकृतः स एव व्याप्तिग्राहकोऽस्तु आवश्यकत्वात् किं भू
योदर्शनेन न च भूयोदर्शनं विना तर्क एव नावतरतीति प्रथमदर्शनेऽपि व्याप्त्यग्रहस्य तर्कसंभवात् न चैवमेवास्तु तर्कस्य व्याप्तिग्रहमूलकत्वेनानवस्थाना
त् जातमात्रस्य प्रवृत्तिनिवृत्तिहेतुत्वमपि तज्जनकव्याप्तिज्ञाने तर्कं विनैवातोऽनानवस्थेति चेत् न तर्हि व्यभिचाराज्ञानेऽपि व्याप्तिग्रहहेतुः वचनतया
पवानन्तरजातिरस्ति सामान्यप्रत्यासत्त्या सर्वोपसंहारादविनाभावग्रहः सामान्यरूपतानसकृद्दर्शनगम्येति भूयोदर्शनापेक्षेति चेत् न सामान्य
स्यादिसत्त्वरूपसत्तः प्रत्यासत्तित्वं लाघवात् न तत्सामान्यतया ज्ञातस्य तेदनभ्युपगमाच्च न च काकतालीयत्वादिशङ्कामुदासार्थं द्वितीयादिदर्शनापे
क्षेति वाच्यम् द्वितीयादिदर्शनेऽपि शङ्कानिवृत्तेरवस्थानात् नन्वेवं सोपाधिकत्वज्ञानं व्याप्तिज्ञाने हेतुः तद्देशकालतत्रावस्थितत्वादीनामुपाधित्वशङ्का
निरासश्च कस्यचित्साधनव्यापकत्वज्ञानेन कस्यचित्साध्याव्यापकत्वज्ञानेनैव स्यात् न च भूयोदर्शनं विनैवेति चेन्न अयोग्योपाधिशङ्काव्यतिरेकस्यानु
मानाधीनज्ञानत्वेनानवस्थानात् अथ साध्यसाधनसहचरितधर्मान्तराणामुपाधित्वसंशये व्याप्तिग्रहो न भवति अतस्तेषामनुपाधित्वज्ञानं भूयोद
र्शनाधीनसाध्यव्यापकत्वादिज्ञाने सतीति भूयोदर्शनापेक्षा अत एव यावता भूयोदर्शनेन तन्निश्चयस्तावद्भूयोदर्शनं हेतुरिति न वा संख्यानियमो न
वाऽननुगमः यद्यपि चान्यस्य साध्यव्यापकसाधनाव्यापकत्वसंशयो नान्यस्य व्याप्तिग्रहप्रतिबन्धकः तथापि तद्द्वारा व्यभिचारसंशयः प्रतिबन्धक
इति तन्निवर्तनमावश्यकमिति चेन्न अयोग्योपाधिसंशयाधीनव्यभिचारसंशयस्य तथाप्यनुच्छेदात् सेव न भूयोदर्शनाज्ञाप्यनुमानादिसत्त्वं अपि
च भूयोदर्शनाहितसंस्कारो न बहिरिन्द्रियसहकारी तदिन्द्रियव्यापारं विनापि सहचारादिज्ञानवतो व्याप्तिग्रहात् नापि मनसः इन्द्रियादिवत्
भूयोदर्शनजसंस्कारस्य तज्जन्यस्मरणस्य वा प्रमाणान्तरापत्तेः तस्मात्परिशेषेण सकृद्दर्शनगम्यासा तथ्याद्युपाधिविरहो व्याप्तिः अभावश्च केवला

सामान्यप्रत्यासत्ति [illegible]

यथेन्द्रियं मनसो रूपादिज्ञाने सहकारि तेन [illegible] तथा

चिन्ताम.
अनु.
४

5

धिकरणं न कालत्रयसम्बन्धो वा स्वप्रकाशत्वं न ज्ञानं वा तच्च प्रथमसम्बन्धदर्शनेनावगतमेव चक्षुरादिना न चाधिकस्तदभावोऽस्ति न च प्रतियोगि
ज्ञानमप्यधिकरणादिज्ञाने जनकं येनोपाधिज्ञानं विना तन्न स्यात् एवमुपाध्यभावे किं चिन्ह्नज्ञानमवशिष्यते उपाध्यभावव्यवहारस्तु तद्विषयमपेक्ष
ते दीर्घत्वव्यवहारवदवधिज्ञानम् न चैवं रासभसम्बन्धवत्तस्य वह्निधूमसम्बन्धज्ञानादेवानुमितिः स्यादिति वाच्यम् उपाधिस्मरणे सति उपाधितद्व्या
प्येतरतदुपलम्भकसमवधाने चोपाध्यनुपलम्भसहितस्य केवलाधिकरणज्ञानस्यानुमितिहेतुत्वाद्व्यवहारहेतुत्वाच्च नन्वेवं प्रथमदर्शने व्याप्ति
ग्रहादि शुभदर्शने रासभादिसंशयवत्तत्संशयो न स्यादिति चेत् न व्याप्तिज्ञानानन्तरं विद्यमानस्यैवोपाधेर्योपाधित्वेन न ज्ञात इति शंकयानुद्दीत
व्याप्यवधिसंशयो न स्यादिति चेन्न व्याप्तिज्ञानानन्तरं विद्यमानस्यैवो यस्य च भूयोदर्शनेनोपाधिशङ्कानिरासद्वारा व्याप्यभावशङ्कानिरासः यद्वा नादि
ज्ञानप्रामाण्यसंशयो व्याप्तिसंशयः यथा बहुदर्शनसामग्र्यां सत्यां बहुदर्शने सति तत्प्रामाण्यसंशयात् व्याप्तिसंशयः न तु विषमसंशयानुरोधेन तत्र बहुद
र्शनमेव न कृतमिति कल्प्यते न चैवं हेतूपाध्यभावस्य व्याप्तित्वात् तस्य केवलाधिकरणे रूपस्य प्रथमदर्शनेऽपि निश्चितत्वात् व्याप्तिग्राहकान्तरस्याभा
वाच्च परिशेषेण सहदर्शनस्य तद्ग्राहकत्वात् तन्निश्चये तज्ज्ञानप्रामाण्यसंशयादेव तत्संशयः न चैवं रासभेऽपि प्रथमं व्याप्तिनिश्चयः स्यादिति वाच्यम् तत्र
व्याप्तेरभावात् स्वरूपतज्ज्ञाने विषयस्य हेतुत्वात् क्वचिदसंसर्गाग्रहात् तद्व्यवहारो दोषमाहात्म्यात् न चात्रापि तथा प्रत्येयमिति विमिश्रानुसरणं नत्व
निमित्तमस्तीत्यारोपरूपत्वमभ्युपगमात् केचित्तु साधनवन्निष्ठात्यन्ताभावाप्रतियोगिसाध्यवत्कत्वं व्याप्तिः तदुभयमपि योग्यत्वात् प्रत्यक्षेणैव वह्निधूमस
म्बन्धानुभवेन प्रथममवगतमेव महानसे योऽत्यन्ताभावोऽन्योन्याभावो वाऽवगतस्तत्प्रतियोगी न वह्निर्न वा वह्निमान् वह्निमानयमित्यनुभवात् रास
भेनत्वावगमेऽप्यग्रेसवाध्यतेरतिशाङ्कातन्न एवं हि तद्वह्निधूमयोरेव व्याप्तिः स्यान्न तु धूमत्ववह्नित्वावच्छेदेन न च तदनुमानोपयोगिवह्नित्ववह्नि
मत्त्वं वा न प्रतियोगितावच्छेदकमिति प्रथमतो ज्ञातुमशक्यमेवेति मैवम् प्रकृतसाध्यव्यापकसाधनाव्यापको वा साधनत्वाभिमतेन सम्बन्धकृत ४
साध्यसम्बन्धितावच्छेदकविशेषणं वोपाधिरुभयथापि न तदभावो व्याप्तिः सिद्ध्यसिद्धिभ्यां तन्निषेधानुपपत्तेः किन्तु यावत्स्वव्यभिचारिव्यभिचारिसा
ध्यसामानाधिकरण्यं साधनवन्निष्ठान्योन्याभावाप्रतियोगि

मानाधिकरण्यमनौपाधिकत्वम् तस्य च प्रथमं ज्ञातुमशक्यत्वात् किंच न वस्तुगत्या व्याप्तेर्ज्ञानं हेतुः किं तु व्याप्तित्वेन तच्चोपाध्यभावत्वम् न चोपाधेर्ज्ञाने तदभावत्वेन ज्ञानं संभवति विशेषणज्ञानं साध्यत्वादिविशिष्टज्ञानस्य न च नियमतः प्रथममुपाधिधीरस्ति यतोऽभावे प्रतियोगिज्ञानं व्यवहारे हेतुर्नाभाव ज्ञाने इति मूलत्वादेवं तथापि तदभावो मा व्यवहारि उपाध्यभावज्ञानाधीनात्व मितिः स्यादेवोपाधिज्ञानं विनापि न चैवं वस्तुतस्तु विशेषादर्शने सहचारादिसाधारणधर्मदर्शनाद्व्यभिचारसंशयात्तन्नियमदर्शनेन व्याप्तिनिश्चयः व्यभिचारसंशयो न व्यभिचारनिश्चयप्रतिबन्धको ग्राह्यसंशयस्य तन्निश्चयाप्रतिबन्धकत्वात् अन्यथा संशयानन्तरं कापि निश्चयो न स्यादिति चेन्न व्यभिचारसंशयः प्रतिबन्धक इति भ्रमः किं तु विशेषादर्शने सति सहचारादिसाधारणधर्मदर्शनात् संशयः स्यात् न तु संशयसामग्रीतो निश्चय इति किंच यदी सामग्री यत्र प्रतिबन्धका विशेषादर्शने तत्र तदीरपीति व्यभिचारसंशयोऽपि प्रतिबन्धकः एवं भूयोदर्शनमपि संशायकं तर्कस्तु न वस्यादुःस्थाप एवेति कथं व्याप्तिग्रह इति अत्रोच्यते व्यभिचारज्ञानाभावसहकृतं सहचारदर्शनं व्याप्तिग्राहकम् ज्ञानं निश्चयः शङ्का च सा च क्वचिदुपाधिसन्देहात् क्वचिद्विशेषादर्शनसहकृतसाधारणधर्मदर्शनात् तद्विरहश्च क्वचिद्विपक्षबाधकतर्कात् क्वचित्स्वतःसिद्ध एव तर्कस्य व्याप्तिमूलकत्वेनानवस्थेति चेन्न यावदाशङ्कं तर्कानुसरणात् यत्र च व्यभिचारशङ्कैव नावतरति तत्र तर्कं विनैव व्याप्तिग्रहः तथा हि धूमो यदि वह्निसमवहितजन्यत्वे सति वह्निसमवहितजन्यः स्यादुत्पन्नो न स्यादित्यत्र किं धूमो वह्नेरेव भविष्यतीति कथं व्यभिचारशङ्का स्यात् स्वक्रियाव्याघातात् यदि हि गृहीतत्वद्व्यतिरेके हेतुं विना कार्योत्पत्तिं शङ्केत तदा ह्य एव धूमार्थं वह्नेः स्वार्थं भोजनस्य परप्रतिपत्त्यर्थं शब्दस्य चोपादानं नियमतः कथं कुर्यात् तेन विनापि तत्संभवात् तस्मात्तदुपादानमेव तादृशशङ्काप्रतिबन्धकं शङ्कायां च न नियतोपादानं नियतोपादाने च न शङ्काप्रतिबन्धकं शङ्कायां च न नियतोपादानं नियतोपादाने च न शङ्का तदिदमुक्तं तदेव ह्याशङ्क्यते यस्मिन्नाशङ्क्यमाने स्वक्रियाव्याघातो न भवतीति न हि संभवति स्वयं वह्न्यादिकं धूमादिकार्यार्थं नियमत उपादत्ते तत्कारणं तन्नेत्याशङ्कते चेति एतेन व्याघातो विरोधः स च सहानवस्थाननियम इति तत्र कथं न वस्येति निरस्तम् स्वक्रिया पाप एव शङ्काप्रतिबन्धकत्वात्

धूमो यदि निकृति
दृष्टिं विनापि स्या
८

चिन्ताम
अनु मा
५

अत एव व्याघातो यदि शङ्कास्ति न चेच्छङ्का ततस्तराम् व्याघातावधिराशङ्का तर्कः शङ्कावधिर्मत इति खण्डनमपास्तम् न हि व्याघातः शङ्काप्रतिबन्धकः किं तु स्व
क्रियैव प्रतिबन्धिकेति न च विशेषदर्शनात् क्वचिच्छङ्कानिवृत्तिरेव स्यात् नैवं ताहशतर्कावतारे भूयोदर्शनं विनेति भूयोदर्शनादरोस्तु स तत एव प्रयोजकः
अत एव न तद्विशिष्टसंस्कारो मानान्तरं तर्कस्याप्रमात्वात् तच्च व्याप्तिज्ञाने हेतुस्सहभावे विशिष्टानुमानाद्व्याप्तिग्रहात् ननु सहचारदर्शनवद्व्यभिचारशङ्का
विरहोप्यनुकूलतर्कयोगेनाव्यभिचारिसाधारणमिति तन्नतो व्याप्तिनिश्चय इति चेन्न स्वरूपसतोरेव तयोर्व्याप्तिग्राहकत्वात् सत्तर्कोद्व्याप्तिप्रमा ततोभा
सानस्य प्रमा विशेषदर्शनसमयत्वासमयत्वाभ्यामनुरूपत्तानमिव अपरे तु यत्र तर्के व्याप्यानुभवो मूलं तत्र तर्कान्तरापेक्षा यत्र स्मृतिर्मूलं न तत्र तर्कान्तरापेक्षे
ति नानवस्था अस्ति च जातमात्रस्येष्टसाधनत्वानुमितिहेतुर्व्याप्तिस्मरणम् न हानीं व्याप्त्यनुभवकाभावात् न स्मृत्यानुभवमूलत्वाचाग्रेपि व्याप्तिस्मरण
परम्परेति यत्तु नादिसिद्धकार्यकारणभावविरोधादिमूलाः केचित्तर्का इति तन्न तत्र प्रमाणान्तरयोगेनानुमान एव पर्यवसानात् न च व्याप्तिग्रहान्यथा
नुपपत्त्यैव तर्कस्यानादिसिद्धव्याप्तिकत्वमनुपपत्तेरप्यनुमानत्वात् अन्येन विपक्षबाधकतर्कादनौपाधिकत्वग्रह एव तदधीनो व्याप्तिग्रह इति तदपि
न तर्कस्याप्रमाणत्वाद्व्यभिचारशङ्कानिरासद्वारा प्रत्यक्षादिसहकारी स इति चेन्न अनवस्थाभयेन तर्कं विना व्याघातादेव शङ्काविरहस्तत्र व्याप्तिग्रहे त-
र्कस्याव्यभिचारात् यत्र योग्यानामुपाधीनां योग्यानुपलम्भादभावग्रहः अयोग्यानां तस्य साध्यव्यापकत्वसाधनाव्यापकत्वसाधनादभावग्रहस्तत्रैनौपाधि-
कत्वस्य ग्रह इति तन्न तथा हि अनुमाने न तत्साधने ऽनवस्थानात् प्रमाणान्तरस्याभावात् येन यावदनुकूलतर्कं विनैव सहचारदर्शनादिमात्रेणैव व्याप्तिग्रह एव
इति तेषां पदेनरत्वस्य साध्यव्यापकत्वग्रहे ऽनुमानमात्रमुच्छिद्येत अनुमानमात्रोच्छेदकत्वादेव च पक्षेतरत्वेनोपाधिरिति चेन्न भ्रान्तोसि न हि वयमुपाधि-
त्वेन तस्य दोषत्वमाचक्ष्महे किं तु साध्यव्यापकत्वेन तद्व्यतिरेकात्पक्षे साध्यव्यावर्त्तकतया व्यापकव्यतिरेके व्याप्यव्यतिरेकस्यावश्यमुपपाद्यमानत्वात् अपि
च कारवद्ग्निसंयोगः शब्दातिरिक्तातीन्द्रियधर्मसमवायीजनकत्वादित्यत्राप्रयोजकत्वात् साधकं तत्र साध्यव्याप्यस्य पक्षधर्मतेति किमप्रयोजकत्वेना- ५
म तस्माद्विपक्षबाधकतर्काभावान्न तत्र व्याप्तिग्रह इत्यप्रयोजकत्वमिति उक्तव्याप्तिप्रकारे व्याप्याव्याप्याभावगर्भैव व्याप्तिरनुमितिहेतुरिति तर्कोवादतानाव्याग

मः अनौपाधिकत्वं तल्लक्षणम् नन्वेवमुपाधिरसिद्ध्युपजीव्यत्वेन व्यभिचारिवद्धेत्वाभासान्तरं स्यान्न तद्व्याप्यभावत्वेनासिद्धिरिति चेन्न तज्ज्ञानमुपजीव्यमपि
न स्वतो दूषकं न ह्यन्यस्य साध्यव्यापकत्वसाधनाव्यापकत्वज्ञानमन्यस्य साध्यव्यापकत्वज्ञाने प्रतिबन्धकमतिप्रसङ्गात् व्यभिचारज्ञानस्य हेतुत्वात्तद्धीस्तथा
न त्वानौपाधिकत्वज्ञानं व्याप्तिज्ञाने हेतुरित्यक्रमम् तथा च व्यभिचारज्ञानद्वारा स दूषकः एवं च परस्परव्यवनि तयासिद्धसाधनवन्न पृथक् न चैवमव्यभिचार
स्य व्याप्तित्वे व्यभिचारस्य तदभावत्वेनासिद्धिः स्यादिति वाच्यम् साध्याभाववद्वृत्तित्वं हि व्यभिचारस्तदभावश्चाव्यभिचारः केवलान्वयिन्यभावात् किं तु सम
मानाधिकरणात्यन्ताभावाप्रतियोगिसामानाधिकरण्यं न चानयोः परस्परविरहरूपत्वमिति व्याप्तिग्रहश्च सामान्यलक्षणप्रत्यासत्त्या सकलधूमादिवि
षयः कथमन्यथाप्रवर्तीयधूमव्याप्तिग्रहे तस्मादनुमितिः सा चेन्द्रियसंबद्धविशेषणता अतिरिक्तैव वा तद्विशेष्यकप्रत्यक्षे तदिन्द्रियसन्निकर्षस्य हेतु
त्वेन नानागतादौ संयोगाद्यभावादिति वदन्ति तदपरे न मन्यन्ते तथाहि धूमत्वावच्छिन्नव्याप्तिः सन्निकृष्टधूमवृत्तिधूमत्वेन प्रत्यक्षेण ज्ञायते ततः स्वतासात्
तीयलिङ्गपरामर्शोपपत्तिरिति धूमवह्नित्वयोर्ज्ञायते न तावदनुमितिस्तदनभ्युपगमेऽपि सन्निकृष्टधूमविषयो धूमत्वेन धूमो वह्निव्याप्य इत्यनुभवः तथैव व्याप्तिज्ञा
नं तत्तेषु धूमवानयमिति व्याप्तिस्मृतिप्रकारेण धूमत्वेन पक्षवृत्तिधूमज्ञानादनुमितिः व्याप्यानुभवतत्स्मरणपक्षधर्मताज्ञानानामेकप्रकारत्वेनानुमितिहेतुता
त् गवादिपदे स्वपिशाचानुभवतत्स्मरणवाक्यार्थानुभवानामेकप्रकारत्वेन हेतुहेतुमद्भावग्रहस्यैवं वच्यते तत्र योग्यतावशादपूर्वव्यक्तिलाभः अनुमानेन
पक्षधर्मताबलाद्धूमो वह्निव्याप्य इत्यनुभवो न तु सर्वो धूमो वह्निव्याप्य इति येन सर्वभानार्थं तत्स्वीकारः वह्निमानित्यनुमितिर्विशेषणज्ञानसाध्या विशिष्टज्ञान
त्वादिति पर्वतीयवह्निभानार्थं तत्कल्पने धूमेऽपि तथात्वकल्पनं चिद्धूमस्य व्यापकत्वाच्चेति चेन्न विशिष्टवैशिष्ट्यज्ञाने विशेषणतावच्छेदकप्रकारज्ञानस्यावश्यकत्वे
न हेतुत्वात् तच्च दण्डमत्र न तु विशेषणज्ञानमपि तथा गौरवात् गौरयमिति विशिष्टज्ञानेऽपि युगपद्विशेषणविशेष्यसन्निकर्ष एव कारणम् न तु निर्विक
ल्पकं मानाभावात् विशिष्टज्ञानत्वमेव मानमिति चेन्न दृष्टान्ताभावात् दण्डी पुरुष इत्यत्र विशेषणतापि जन्यतानभ्युपगमात् विशिष्टवैशिष्ट्यज्ञानत्वात् अ
पि च प्रमेयत्वेन व्याप्तिपरिच्छित्तौ सर्वज्ञः स्यात् तथा च परकीयज्ञानविषयेष्टत्वेन वेत्ति तस्य संशयो न स्यात् प्रमेयत्वेन तदन्यतरनिश्चयात् प्रमेयत्वेन तद्ग्रहं ज्ञा

चिन्ताम
अ. मा.
६

6

नात्येव ह्रस्वत्वं तस्य न जानातीति चेत् तत्किं ह्रस्वत्वं न प्रमेयं येन न त सकलवह्निधर्मस्य प्रमेयत्वेन तज्ज्ञानाभावात् उच्यते यदि सामान्यलक्षणा-
स्ति तदानुकूलतर्कादिकं विना धूमादौ व्यभिचारसंशयो न स्यात् प्रसिद्धधूमे वह्निसम्बन्धावगमात् कालान्तरीयदेशान्तरीयधूमस्य मानाभावेनाज्ञानात्।
सामान्येन तु सकलधूमोपस्थितौ धूमान्तरे विशेषादर्शनेन संशयो युज्यते यत्तु पाकादौ चिकीर्षास्वत्वोदाविच्छा न स्यात् सिद्धेरिच्छाविरहात् अप्रसिद्धस्याज्ञा-
नात् तस्मात् सुखत्वादिना ज्ञाते सुखे सर्वेप्रसिद्धिर्विरहाद्यासिद्धे भवतीत्युपेयमिति तन्न असिद्धत्वेनापि सिद्धगोचरज्ञानादेवेच्छाप्रवृत्तिस्वाभाव्यादसिद्धत्वेनोपप-
त्तेः न चातिप्रसङ्गः समानप्रकारत्वेन ज्ञानेच्छाकृतीनां कार्यकारणभावात् न तु समानविषयत्वेनापि कचिदपकल्पनात् समानविषयत्वे सत्यपि समान-
प्रकारकज्ञानाभावेनेच्छाकृत्योरभावात् तस्मादूपकत्वेन गौरवाच्चेति परसिद्धान्तात् न च सर्वज्ञत्वे संशयो न स्यादिति दोषः ह्रदः सरति ह्रस्वत्वप्रकारकं ज्ञानं संश-
यविरोधित्वं च न त्वेतत्सामग्रीविरहात् अतो ह्रस्वत्वादिसकलविशेषज्ञानेऽपि सह्रदोऽनवेति संशयः उपाधिज्ञानाद्व्यभिचारज्ञाने सति न व्याप्तिनिश्चय इत्युपा-
धिर्निरूप्यते तत्रोपाधिः साध्यत्वाभिमतव्यापकत्वे सति साधनत्वाभिमताव्यापकः अतो नोपाधिकत्वज्ञानं च न व्याप्तिधीहेतुरतो व्यापकत्वादिज्ञानेनान्योन्या-
श्रयः यद्वा व्यापकत्वं तन्निष्ठात्यन्ताभावाप्रतियोगित्वं तत्प्रतियोगित्वं चाव्यापकत्वम् प्रतियोगित्वं च तदधिकरणानधिकरणत्वमिति वदन्ति तन्न सा-
धनपक्षधर्मावच्छिन्नसाध्यव्यापकोपाध्यव्याप्तेः न च तयोरनुपाधित्वं दूषकताबीजसाम्यात् मित्रातनयत्वेन श्यामत्वसाधने शाकपाकजत्वस्य प्रत्यक्षस्पर्शा-
श्रयत्वेन वायोः प्रत्यक्षत्वे साध्येऽनुद्भूतरूपस्य च प्रत्यक्षजनकत्वेनोपाधित्वस्वीकाराच्च एतेनैतेति व्याप्तेश्च न च व्यतिरेके एवं तेनैतरान्यत्वादिरूपं नैतरान्यत्वस्यासि-
द्धिवारणार्थं पर्वतेतरपदे विशेषणमिति व्यतिरेके व्यर्थविशेषणत्वान्न स उपाधिः बाधोन्नीतस्य पक्षेतरोपाधितापत्तेः न चेष्टापत्तिः इतरान्यत्वस्याप्रसिद्ध्या विशेष-
णं विनाऽव्याप्यग्रहे तत्सार्थकत्वात् वस्तुगत्या साध्यव्यापकः पक्षेतर उपाधिरिति चेत् अस्तु तथापि पक्षातिरिक्ते साध्यव्यापकताग्रहादुपाधेर्दूषकत्वं तच्चागत्या-
पत्ति अन्यथा पक्षे साध्यसन्देहादनुपाधित्वे उपाधिमात्रमुच्छिद्येत विपक्षबाधावर्तकविशेषणशून्यत्वं विशेषणं तेन बाधोन्नीतपक्षेतरस्य परिग्रहः तत्र प- ६
क्षस्य विपक्षत्वान्न तु पर्वतेतरत्वादेरिति चेन्न न हि वस्तुगत्या विपक्षबाधावर्तकविशेषणशून्यत्वं सर्वत्र प्रमेयत्वादेः सत्त्वात् तत्रोपात्तेति विशेषणे सिद्धासिद्धि

भं व्याप्तात्ः तथापि साध्यव्यापकत्वसाधनाव्यापकत्वेन दूषकतानियताव्यापकत्वे साध्यव्याप्तिविरहेणैव व्यभिचार एव व्यभिचारे चावश्यमुपाधिरिति य-
त्वे तत्त्वमेव तत्रोपाधिः स्यात् तावन्मात्रस्यैव दूषकत्वाच्च व्यर्थविशेषणत्वम् अत एवानुमानमात्रोच्छेदकतया जातित्वान्न पक्षेतरत्वमुपाधिरित्यपास्तम् दूषणा-
समर्थत्वेन जातित्वाभावात् एतेन पक्षेतरत्वमाहृत्य सर्वप्रकारान्तरमपि निरस्तम् उपाधित्वाभावेपि दूषणासमर्थत्वात् अथोपाधिः स्वव्यतिरेकेण सत्प्रति-
पक्षतया दूषणं पक्षेतरत्वव्यतिरेकस्य च साध्याभावसाधकः असाधारण्यान्न तु व्यभिचारोन्नायकतया यथा हि साध्यव्यापकोपाध्यव्याप्यतया हेतोः
साध्याव्यापकत्वं तथा साध्यव्याप्यहेतुव्यापकतयोपाधेः साध्यव्यापकत्वमपि सिद्धेन व्याप्तिग्राहकस्योभयत्रापि साम्येन विनिगमकविरहात् तस्माद्य-
था साध्यव्याप्येन हेतुना साधनीयं तथा साध्यव्यापकोपाधिव्यावृत्त्या साध्याभावोपि साधनीयो व्याप्तिग्रहतौल्यादिति दूषकताबीजं सेयं सत्प्रतिपक्षत्व-
वेति मैवम् एवं हि सत्प्रतिपक्षे उपाध्युद्भावनं स्यात् सत्प्रतिपक्षान्तरवत् किं चैवं बाधोन्नीतोपि पक्षेतरो नोपाधिः स्याद्व्यतिरेके साधारण्यात् न तु बाधे नो-
पाधिनियमः धूमेन ह्रदे वह्निसाधने तदभावात् न च हेतुमति पक्षे बाधे पक्षेतरो नोपाधिनियमः प्रत्यक्षेण वह्नौ कृतकत्वेनानुष्णत्वसाधने जलत्वादेरुपाधित्वसं-
भवादिति चेन्न तेजोमात्रपक्षत्वे तेजस्त्वं विना तस्योपाधेरभावात् अपि च पर्वतावयववृत्त्यन्यत्वे पर्वतेतर— श्यत्वं दूरदर्शनसंयोगानाधारत्वेन दृश्यपर्वतान्य-
त्वादिकमुपाधिः स्यादेव व्यतिरेके साधारण्याभावाद्व्यतिरेकिणा सत्प्रतिपक्षसंभवाच्च न चासाधारण्येन तस्यापि सत्प्रतिपक्षत्वात्साधकतया दोषत्वात् तस्मा-
दुभयोरपि व्याप्तिग्राहकसाम्ये विरोधान्न व्याप्तिनिश्चयः किं तूभयत्र व्यभिचारसंशयस्तथा च व्यभिचारसंशयाधायकत्वेनोपाधेर्दूषकत्वं तच्च पक्षेतरेपि
त्वदुक्तं उपाधेरेव व्यभिचारशङ्कास्ति भवतश्चोक्तन्यायेन सकलानुमानोच्छेदप्रसङ्गः यावत्पक्षेतरो नोपाधिस्तथापि तत्तत्र मते व्यापकमेव नापि साध्यसमव्या-
प्तत्वे सति साधनाव्यापकत्वमुपाधित्वं दूषकताबीजं स्वव्यभिचारोन्नायकत्वं सत्प्रतिपक्षत्वं वा साम्येन विषमव्याप्तस्योपाधित्वात् तथा दूषकता यो साध्य- ७
व्यापकत्वस्य प्रयोजकत्वाच्च अत्र साध्यप्रयोजको धर्म उपाधिः प्रयोजकत्वं च तन्निरूपिताधिकरणे तस्मिन्सत्यभवतस्तेन विनापि भवतस्तु तदप्रयोज्य-
त्वात् अन्यथा पक्षेतरस्याप्युपाधिप्रसङ्गादिति चेत् न दूषणौपयिकं त्वं हि प्रयोजकत्वमिह विवक्षितम् तच्च साध्यव्यापकत्वे सति साधनाव्यापकत्वमेव तत्

वि॰ म॰
प्र॰ मा॰
७

देवप्रयोजकं न त्वधिकं व्यर्थत्वात् न तूपाधिः सत्त्वात्ते यद्धर्मो यत्र प्रतिबिम्बते यथा जपाकुसुमं स्फटिके लौहित्ये उपाधिस्तथा चोपाधिहेतौ व्याप्यत्वं हे
तौ तत्वाभिमतेव कालिते नासावुपाधिर्न च व्याप्यत्वमात्रेणादूषणात्वमिति साध्यव्यापकत्वापीद्याने तथा च समव्याप्त एवोपाधिरिति चेन्न किं विषमव्याप्तस्य
स्य दूषकता वीजाभावान्नोपाधिशब्दवाच्यत्वं तथात्वे प्युपाधिपदस्य शक्तिनिमित्ताभावाद्वा नाद्यस्तस्यापि व्यभिचारानुन्नायकत्वात् नापरः न हि लोके सम
व्याप्त एव तावत्स्वधर्मप्रतिबिम्बजनक एवोपाधिपदप्रयोगस्तथात्वनुपाधिना कृतमिस्यादौ तत्राभावादावप्युपाधिपदप्रयोगात् किं च न शास्त्रे लौकिकव्यवहारा
र्थं त्वनुपाधिमुत्पादनम् किं त्वनुमानदूषणार्थं तच्च साध्यव्यापकत्वसाधनाव्यापकत्वमात्रमिति शास्त्रे तत्रैवोपाधिपदप्रयोगः सम्येत यदभावो व्यभिचार
विरोधी स उपाधिः न च विषमव्याप्तस्याभावो व्यभिचारं विरुणद्धि तस्याभावेपि व्यभिचारात् अस्ति ह्यनित्यत्वव्यापकं प्रमेयत्वं तदभावेपि गुणत्वे न चानित्यत्व
गुणत्वयोर्व्याप्तिरस्ति समव्याप्तिकस्य च व्यतिरेकस्तथा न हि साध्यव्यापकव्याप्यभूतस्य व्याप्यं यत्साध्यं व्यभिचरति व्यभिचारेच्चान्ततः साध्यमेवोपाधिरभेदे
पि व्याप्यव्यापकत्वात् साधनाव्यापकत्वादिति अन्यथा कृतकत्वेनानित्यत्वसाधने कृतकत्वमेवोपाधिः स्यात् अभेदे व्याप्यव्यापकत्वे साधनव्यापकत्वा
दिति स्वीचक्रुः तन्न न— व्यभिचारे साध्यव्याप्यव्याप्यत्वं तन्त्रमावश्यकत्वाल्लाघवाच्च न तु साध्यव्यापकव्याप्यत्वमपि भवतैव व्यभिचारस्य दर्शितत्वात् न
च साध्यव्याप्यव्याप्यत्वमेवानौपाधिकत्वे साध्यव्याप्यमित्यत्रापि ह्यनौपाधिकत्वं तदेव वाच्यम् तथा चानवस्थेति अनौपाधिकत्वे च व्याप्तिलक्षणे यावदिति
पदे साध्यव्यापकत्वे विशेषणं दत्तमेव किं च यस्मिन् सत्यत्रेमिति नैभवति तदेव तत्र दूषणं न तु यद्व्यतिरेके भवत्येवेत्यतऊंभे विरुद्धत्वादेरप्यदूषकत्वापा
तात् नापि पक्षधर्मावच्छिन्नसाध्यव्यापकत्वे सति साधनाव्यापकत्वमुपाधित्वं साधनावच्छिन्नसाध्यव्यापकोपाध्यव्यापनात् शब्दोभिधेयः प्रमेयत्वादि
त्यत्राश्रावणत्वस्योपाधित्वापातात् शब्दधर्माद्गुणत्वावच्छिन्नाभिधेयत्वं यत्र तत्पक्षधीतत्राश्रावणत्वं व्यापकं हि तत्र आर्द्रेन्धनवत्वादौ उपाधौ पक्षनियत
त्वाद्धर्माभावाच्च अथ साधनावच्छिन्नसाध्यव्यापकत्वे सति साधनाव्यापकत्वमुपाधिस्तेन ध्वंसस्य जन्यत्वेन ध्वंसप्रतियोगित्वे साध्ये साधनावच्छिन्नसाध्य
व्यापकोभावत्वमुपाधिः श्यामत्वे शाकपाकजत्वमिति तन्न पक्षधर्मावच्छिन्नसाध्यव्यापकोपाध्यव्यापनात् जलं प्रमेयं रसवत्त्वादित्यत्र रसवत्त्वावच्छिन्नसा

पक्षे प्रमेयत्वस्य सा
धनस्याव्यापकं ॥
७

अव्यापकः पृथिवीत्वस्योपाधित्वप्रसङ्गात् सोपाधित्वादसाधकमित्यत्र साधनावच्छिन्नसाध्यव्यापकव्यभिचारित्वे साधनावच्छिन्नेऽपि तस्य व्यर्थत्वप्रसङ्गाच्च
किंच पक्षेतरद्येऽपि विशिष्टसाध्यव्यभिचार विशिष्टसाध्यतिरेकं वा प्रसाध्य पश्चात्केवलसाध्यव्यभिचारः केवलव्यतिरेको वा साधनीयस्तथा चार्थान्तरं केव
लसाध्ये हि विवादो न तु विशिष्टे अप्रकृतव्यभिचारसिद्ध्यर्थं विशिष्टव्यभिचारः साध्य इति चेन्न अप्राप्तकालत्वात् प्रथमं साध्यव्यभिचारएवोद्भाव्यः न
त्रापि सिद्धावुपाधिरिति चेन्न हि प्रकृतानुमाने नोपाधिर्दूषणं स्यात् किंच साध्यव्यभिचारदेतत्वे न पक्षधर्मावच्छिन्नसाध्यव्यापकव्यभिचारएवोपयसनी
योनोपाधिः स्यादेतन्न पर्यवसितसाध्यव्यापकत्वे सति साधनाव्यापक उपाधिः पर्यवसितं साध्यं पक्षधर्मताबललभ्यं यथा पृथिवीत्वानित्यत्वातिरिक्तशब्दधर्मा
तिरिक्तधर्मवान्प्रमेयत्वादित्यत्र पर्यवसितं साध्यं मनित्यत्वं तस्य व्यापकं कृतकत्वमुपाधिः यदि च तत्रैव कृतकत्वमपि शब्दे साध्ये तदानित्यत्वमुपाधिः
तदुक्तं वायुक्तसाध्यनियमश्च नोपिकयुक्ते रूपाधिरुद्भाव्यः पर्यवसितं नियमदूषकताबीजसाम्यान्यादित्यनेन पक्षधर्मसाधनावच्छिन्नसाध्यव्यापको
ऽप्युपाधिः संगृह्यते तादृशस्य साध्यस्य पर्यवसितत्वादिति तन्न एवं हि द्व्यणुकं सावयवत्वसिद्धणुकमनित्यद्रव्यासमवेतं जन्यमहत्त्वानधिकरणद्र
व्यत्वादित्यत्र निस्पर्शद्रव्यसमवेतत्वमुपाधिः स्यात् भवति हि नित्यद्रव्यसमवेतत्वं पर्यवसितं साध्यं तस्य व्यापकं साधनाव्यापकं च किंच पक्षधर्मताबल
लभ्यसाध्यसिद्धौ निष्फलउपाधिस्तदसिद्धौ कस्य व्यापकं न हि सोपाधौ पक्षधर्मताबलात्साध्यं सिद्ध्यतीत्यस्य व्यापक उपाधिः स्यादिति अत्रोच्यते यद्व्यभिचा
रित्वेन साधनस्य साध्यव्यभिचारित्वं स उपाधिः लक्षणं तु पर्यवसितसाध्यव्यापकत्वे साधनाव्यापकत्वं यद्धर्मावच्छेदेन साध्यं प्रसिद्धं तदवच्छिन्नं पर्यवसि
तं साध्यं स च धर्मः क्वचित्साधनमेव क्वचिद्द्रव्यत्वादिः क्वचित्सहानसत्वादीति तथा हि समव्याप्तस्य वा साध्यव्यापकस्य व्यभिचारेण साधनस्य साध्यव्यभि विषमव्याप्तस्य
चारः स्फुट एव व्यापकव्यभिचारिणस्तद्व्याप्यव्यभिचारित्वनियमात् साधनावच्छिन्नपक्षधर्मावच्छिन्नसाध्यव्यापकयोर्व्यभिचारित्वेन साधनस्य सा
ध्यव्यभिचारित्वमेव यथा ध्वंसस्यानित्यत्वे साध्ये भावत्वस्य वायोः प्रत्यक्षत्वे साध्ये उद्भूतरूपवत्त्वस्य विशेषणव्यभिचारिणा साधने विशिष्टव्यभिचारस्य
विशिष्टव्यभिचारत्वनियमात् अतएवार्थान्तरं विशेषणव्यभिचारित्वेन ज्ञाते साधने विशिष्टव्यभिचारसिद्ध्या विशेष्यसाध्यव्यभिचारमादायैव

चिं.म.
अ.मा.
८
8

सिद्धांतिपक्षधर्मताबलात् अन्यथाप्रतीतेरपर्यवसानात् न च पक्षधर्मताबलात्मकत्वसिद्धावर्थान्तरत्वं यद्वा प्रत्यक्षस्पर्शाश्रयत्वेऽप्रत्यक्षत्वव्यभिचारि द्रव्य
त्वाव्यभिचारित्वे सति द्रव्यप्रत्यक्षत्वव्यापकाव्यभिचारित्वात् महत्त्ववत् तथा मित्रातनयत्वे श्यामत्वव्यभिचारि मित्रातनयत्वाव्यभिचारित्वे सति श्यामत्वमि
त्रातनयत्वव्यापकव्यभिचारित्वात् प्रहरत्ववत् अव्यभिचारस्य तत्समानाधिकरणात्यन्ताभावाप्रतियोगित्वं तद्व्यभेदेऽपि यद्वा यत्साधनव्यभिचारी सा
ध्यव्यभिचारोन्नायकः स उपाधिः तत्त्वं च साक्षात्परंपरया चेति वार्थान्तरं किं चार्थान्तरस्य तद्रूपदोषत्वात् आभासान्तरस्य तत्राभावादुपाधिरेव तत्राभावत्वा
दिकं दोषः न चैवं शब्दो विधेयः प्रमेयत्वादिमत्त्वाश्रावणत्वं जलं प्रमेयं रसवत्त्वादित्यत्र पृथिवीत्वमुपाधिः स्यादिति वाच्यम् केवलान्वयित्वसाधकप्रमा
णेन तत्र साध्यसिद्धेरुपाधेर्विशिष्टाव्यापकत्वात् न च पक्षेतरे स्वव्याघातकत्वेनानुपाधायकत्वादिमुक्तम् बाधोन्नीते चानुकूलतर्कोऽस्त्येव एवं पर्वताव
यवहुमत्त्वादेरपि नोपाधित्वं पक्षमात्रव्यावर्तकविशेषणवत्त्वात् अत एव धूमे आर्द्रेन्धनप्रभववह्निमत्त्वं द्रव्यवहिरिन्द्रियप्रत्यक्षत्वे चोद्भूतरूपवत्त्वं मि
त्रातनयश्यामत्वे शाकपाकजत्वं जन्यानित्यत्वे भाववत्त्वमुपाधिः तदुत्कर्षेण साध्योत्कर्षादन्यथासिद्धान्वयव्यतिरेक-- कात्कारणतावगमेन हेतो
र्मज्जनप्रसङ्गे न च साध्यव्यापकतानिश्चयात् तत्किं कार्यकारणयोरेव व्याप्तिः तथा च बहुव्याकुली स्यादिति चेन्न तदुपजीव्यानेषामप्यनुकूलतर्केण
व्याप्तिनिश्चयात् यत्र च साध्योपाध्योर्हेतुसाध्ययोर्वा व्याप्तिग्राहकसाम्यात्तैकत्र व्याप्तिनिश्चयः न च सन्दिग्धोपाधित्वं व्यभिचारसंशयाधायकत्वात् यद्वा
चनाहश्योकत्वानुकूलतर्कावतारः न तदा हेतुत्वमुपाधित्वं वा निश्चितं पक्षेतरत्वस्य स्वव्याघातकत्वेन न हेतुव्यभिचारसंशयाधायकत्वमतो न सन्दिग्धो
पाधिरपि सः यत्तु पक्षेतरस्य यथा साध्यव्यापकत्वं तथा साध्याभावव्यापकत्वमपि व्याप्तिग्राहकसाम्यात् तथा चोभयव्यापकनिहत्या पक्षे साध्यतद्भा
वन्निहत्याभविनव्याम् न चैवं तथा च पक्षेतरः साध्यव्यापकतासंशयेन स्वयं सन्दिग्धः कथं परं दूषयेदिति तन्न तथापि हि साध्यव्यापकतापक्षमालम्ब्य
हेतुव्यभिचारसंशयाधायकत्वेन दूषणं स्यादेव ननु यत्रोपाधिस्तत्र यद्यनुकूलस्तर्को नास्ति तदा तदभावेनैव व्याप्तेरग्रहः अथास्ति तदा साध्यव्याप्याव्याप ८
कत्वेनोपाधेः साध्याव्यापकत्वनिश्चयान्नोपाधिरित्युभयथापि नोपाधिदूषणं न च व्याप्त्यभावव्याप्यमुभयमत उपाधिरपि तदभावोन्नयनेन दोष इति वाच्यम्

डुपाधेराप्तत्वाभावार्थमत्रकृतत्वकाभावोपजीवकत्वेन तस्यैवदोषत्वादितिचेन्न सोपाधि — कत्वसाध्यतदभावसम्बन्धविरुद्धत्वादवच्छेदकभेदेनतदुभ-
यसम्बन्धोवाच्यः तथाचसाधनेसाध्यसम्बन्धितावच्छेदकरूपस्योपाधिरवच्छेद्यंवाच्यस्तथात्रकृतत्वकाभावोव्यावृत्तकरूपभयोरपि विनिगमकाभा-
वाद्दूषणत्वम् अथोत यद्धाद्दूष्यायस्यसाधनस्यसाध्यंनिवर्त्ततेस्वधर्मस्तत्रेदृतानुपाधिः सचधर्मोयस्याभावात्मतेसाध्यसाधनसंबन्धा --- यथाईन्ध-
नवत्त्वम् व्यावर्त्ततेदितद्याह्यायाश्मवत्त्वमयोगोलके ऽतएवतत्रसाध्यसाधनसम्बन्धाभावः पत्तेएवंभावत्वव्याहृत्ताधंसे जन्यत्वानित्यत्वयोः सम्बन्धो
निवर्त्तमानः पत्तधर्मताबलादनित्यत्वाभावमादायचसिद्धातितथावाधोरूद्दत्वरूपवत्त्वंनिवर्त्तमानंद्रव्यत्वेसतिप्रत्यक्षत्वंनिवर्त्तयत्यत्वभावमा-
दायैवसिद्ध्यति तथाचोभयत्रापिपत्तेसाध्याभावसिद्धासाध्यसाधनसंबन्धाभावोस्तीति अतएवबाधावच्छीनपत्तेतरस्यनोपाधित्वंसव्याघातकत्वेन
तद्व्यतिरेकस्यसाध्याव्यावर्त्तकत्वादिति यद्रूपाधिमात्रस्यतत्वत्त्वंतदव्यतिरेकिधर्मत्वंपत्तेतरेपिकश्चिदुपाधिस्तत्तदुपाधेस्तत्तत्साध्यव्यापकत्वेसतितत्त-
साधनाव्यापकत्वं नचधूमेवह्निसम्बन्धउपाधिःपत्तेतरत्वस्यादितिवाच्यम् व्यापाद्याप्रसिद्धेरिति तत्र अनुमितिप्रतिबन्धकज्ञानविषयतावच्छेदकमु-
पाधित्वमित्यनिरुत्त्यम् तद्व्यतिरेकित्वम् अतिप्रसङ्गात् विशेषत्वत्वेनत्वबह्निमसम्बन्धेपत्तेतरत्वस्योपाधित्वप्रसङ्गात् केचिन्न साधनव्यापको-
प्युपाधिः क्वचिद्यत्रपत्ताहृनिर्हेतुः यथाकरकापृथिवीकठिनसंयोगवत्वादित्यत्रानुष्णाशीतस्पर्शवत्त्वंनचतत्रस्वरूपासिद्धिरेवदोषः सर्वत्रोपाधेर्दू-
षणत्वप्रसङ्गादितिमाहुः साध्यंचनोपाधिः व्यभिचारसाधनेसाध्यविशिष्टत्वात् अनुमितिमात्रोच्छेदप्रसङ्गश्च सचायंद्विविधोनिश्चितः सन्दिग्धश्च
साध्यव्यापकत्वेनसाधनाव्यापकत्वेनचनिश्चितोव्यभिचारनिश्चायकत्वेननिश्चितोपाधिः यथावह्निमत्त्वेनधूमवत्त्वेसाध्येआर्द्रेन्धनप्रभववह्निमत्त्वं
यत्रचसाधनाव्यापकत्वसन्देहोवासाध्यव्यापकत्वसन्देहोउभयसन्देहोवातत्रहेतुव्यभिचारसंशायकत्वेनसन्दिग्धोपाधिः यथामित्रातनयत्वेनश्याम-
मत्वेसाध्येशाकाद्याहारपरिणतिजत्वं नचतेनैवहेतुनातदपिसाध्यंतत्रश्यामत्वस्योपाधित्वात् उभयस्यापिसाधनेचार्थान्तरं श्यामत्वमात्रेविवादेनत-
भयत्रनचैवंधूमाहृत्कानुमानेपिवह्निसामग्रीउपाधिःस्यात् तत्रवह्निनेवतत्सामग्र्याःसर्वधूमस्यानैवोपाधिकत्वनिश्चयात् अत्रतुमित्रातनयत्वंव्याप्यश्याम

ईश्वरानुमाने शरीरजन्यत्वादि(ना)र्नोपलत्वादिः
यथा चरमाकपाकजत्वस्योपाधित्वसन्देहे ॥ २

चिं॰म॰ त्वसामग्र्यास्यान्तर्व्याप्तिमत्त्वकार्यकारणभावादीनां व्याप्तिग्राहकाणामभावः अत एव साध्यसामग्र्या सह यत्र हेतोरपि व्याप्तिग्राहकमस्ति तत्र सामग्री(
अ॰मा नोपाधिः यत्र तत्र व्याप्तिस्तत्र साध्यमुपाधिरित्यमिमन्ध्याय सामग्री च क्वचिन्नोपाधिर्न तु सर्वत्रेत्युक्तम् यथा तत्र योगत्वे मृषोरूपाधेः साध्यव्यापकता
५ सन्देहे मिथ्यात्वनयत्वे यत्रोपाधिसन्देहो नोपाधिर्न वा हेत्वाभासान्तरमिति तदुद्भावनेन निरनुयोज्यानुयोग इति तन्न सन्दिग्धानैकान्तिकवत् व्यभिचा
9 रसंशयाधायकत्वेन दूषणत्वात् उपाधेरिव व्यभिचारनिश्चयाधायकतया इदानीं दूषकताबीजं निरूप्यते नास्य व्यतिरेकद्वारा सत्प्रतिपक्षोत्थाप
कत्वेन दूषकत्वं तदा हि न सत्प्रतिपक्षे सत्प्रतिपक्षान्तरवदुपाधेरुद्भावनं न स्यात् न च प्रतिपक्षबाहुल्येनाधिकबलार्थमुपाध्युद्भावनं न स्यात् व्या
कानां पक्षधर्मतेति न्यायात् एकेनापि बहूनां प्रतिबन्धाच्च व्याप्तिपक्षधर्मते हि बलं तच्च तुल्यमेव न तु भूयस्त्वमपि एक — — इत्यनुमितेः सन्दिग्धोपाधे
र्दूषकताबीजं तु व्यतिरेकस्य पक्षे सन्दिग्धत्वात् अपि चैवं बाधोन्नीतपक्षेतरत्वस्योपाधित्वं न स्यात् व्यतिरेके साधारण्यात् पक्षवृत्तिश्चोपाधि(
र्न स्यात् यथा हरेर्निमित्ताद्द्रव्यत्वादित्यत्र कार्यत्वं अन्यकारेऽध्वंसात् ग्रहणप्रतीयमानत्वादित्यत्र श्रावणत्वं तद्व्यतिरेकस्य पक्षावृत्तित्वात् न च नाय(
मुपाधिः तल्लक्षणस्य सत्त्वात् अन्यथापि दूषकत्वसंभवाच्च किञ्च साध्याव्याप्यव्यापकत्वेनोपाधेः साध्याव्यापकत्वे तद्व्यतिरेकेण कथं सत्प्रतिपक्षः
न ह्यव्यापकस्य व्यतिरेकादव्याप्यव्यतिरेकसिद्धिरिति नापि व्याप्तिविरहरूपवज्रयाञ्चल्लित्वेनानौपाधिकस्य व्याप्तित्वनिरासात् नाप्यनौपाधिक(
त्वज्ञानस्य व्याप्तिधीहेतुत्वेन व्याप्तिज्ञानकारणविघटकतया व्याप्यत्वासिद्धेरन्तर्भावः नह्यन्यस्य साध्यव्यापकत्वसाधनाव्यापकत्वज्ञानं अन्यस्य व्याप्तिज्ञा
नेऽस्वतः प्रतिबन्धकमित्युक्तं न च साध्यव्यापकाव्याप्यत्वज्ञाने विद्यमाने साधनस्य साध्यव्याप्यत्वज्ञानं नोत्पत्तुमर्हतीति वाच्यम् न हि साध्यव्यापकव्याप्य(
त्वज्ञाने व्याप्तिज्ञाने कारणं येन तत्प्रतिबन्धकं स्यात् किन्तु साध्यव्यापकव्यभिचारित्वेन साध्यव्यभिचारित्वद्वारा नापि व्यभिचारोन्नायकत्वेन तथा हि सा
ध्यव्यापकव्यभिचारितया साधनस्य साध्यव्यभिचारित्वमत्रमेयम् तथा च साध्याव्याप्यव्यभिचारित्वेनोपाधेः साध्यव्यभिचारित्वमनुमेयम् तेन यत्र सा ५
ध्याव्याप्यव्यभिचारित्वं व्याप्तिग्राहकसाम्यात् नापि साध्यव्यापकाव्याप्यत्वेन व्याप्तिविरहोन्नायकतया साध्याव्याप्यव्यापकत्वेनोपाधेरेव साध्याव्याप

कत्वसाधनात् तस्मादुपाधिर्हेत्वाभासान्तरमिति प्राहुः ध्वनवत्त्वादेरेवोपाधेस्तर्कादिना साध्यव्यापकत्वसाधनाव्यापकत्वे निश्चिते दूषकताबीज-
चिन्त्यमिति यदि साध्यसाधनसहचारदर्शनेनोपाधौ साध्यव्यापकतानिश्चय एव नास्ति तदोपाधित्वनिश्चयाभावाद्दूषणतैवास्य नास्तीति कथं
द्विभावान्तर्भावचिन्ता किं च सम्प्रतिपन्नतया व्याप्यत्वासिद्धतया स्यात्तन्त्रेण वा यदि दूषणत्वं तदा सर्वेषां साध्यव्यापकतानिश्चयो वक्तव्यः तेन वि-
ना तेषामभावात् तस्मादुपाधेर्निश्चयाद्व्यभिचारनिश्चयः तत्संशयात्तत्संशय इति व्यभिचारज्ञानद्वारा साध्यव्यापकाव्याप्यत्वेन व्याप्तिविरहोन्नायक-
त्वेनोपाधेर्दूषकत्वम् यद्वा साध्यव्यापकाभाववद्वृत्तितया साध्यव्यभिचारित्वमुन्नेयम् न च साधनाभाववद्वृत्तित्वमुपाधिः उपाधिमात्रोच्छेदप्रस-
ङ्गात् सम्प्रतिपन्नेपि सर्वे साधनव्यतिरेकवत् ग्रहत्विगगनादौ साध्यव्यापकत्वाच्च संयोगादौ हेतौ साधनव्यापकत्वाच्च अयं चोपाध्याभासः असाधा-
रणविपर्ययः यथान्वयव्यतिरेकिणि साध्ये वाध्योत्रीनामस्तेतरः अप्रसिद्धसाध्यविपर्ययः यथा केवलान्वयिनि साध्ये पक्षेतरादिः बाधितसा-
ध्यविपर्ययः यथा वह्निरनुष्णस्तेजस्त्वादित्यत्र कृतकत्वम् पक्षाव्यावर्तकविपर्ययः यथा क्षित्यादिकं सकर्तृकं कार्यत्वादित्यत्र एव व्यतिरिक्तत्व रेकमा
व्यतिरिक्तत्वावच्छेदकावच्छिन्नभवेत् रूपताश्रययावतामप्येव्यक्तानन्तराभावज्ञानेपि तद्धेतोधेन तदभावज्ञानस्यैव विवक्षितत्वविवेकेन विरोधितयास्वभा-
वत्वस्यैव विरोधितावच्छेदकत्वात् न चात्र संशयः तत्प्रतियोगिकविशेषाभावानां निश्चितत्वात् यावत्त्वनिश्चयस्याप्यन्यथोक्तक्रमेण यथासिद्धतया
विरोधित्वेनाकल्पनात् तस्माद्विरोधितया तत्प्रतियोगिकपदाभावः संशयकोटिः स चेदस्यो नास्ति तत्कथं तत्संशयेन चेदेतावद्लक्षणे तदीयरूपाभावमे-
वादाय संशयस्तन्निश्चये संशयानुत्पत्तेरिष्टत्वमनेन च यत्प्रतियोगिभेदेनाभावभेदाभ्युपगमे तत्प्रतियोगिकानामपि च तेषाम् अभावानामभावाना-
मभेदः स्यादिति तत्कालसंसर्गतादात्म्यात्मकावच्छेदकभेदेन भेदस्तत्र सर्वसंमत इति सामान्यस्यावच्छेदकस्य सत्त्वेन तदवच्छिन्नाभावस्यावश्यक इति
बाधकाभावे सम्बन्धिकपदार्थमात्रस्यैवावच्छेदकभेदेन भेदकल्पनात् पक्षविशेषाभावगोचरत्वेन रूपाभावोल्लेखीन संशयः स्यात् किं तु तत्तदभावो-
ल्लेखीति क्रमेण सामान्याभावे संशयः प्रमाणमिति तन्न तथा सति संशयपर्यन्तधावनविशेषाभावनिश्चयोपदर्शनयोरनुपपत्तेः यावत्तातया निश्चय-

स्याप्युक्तरीत्याप्रमाणत्वात् तदुक्तिस्वपेक्षक्रमेणसंशयस्य प्रामाण्यात् नञ्पदर्शितस्यार्थाणमात्रप्रयोगित्वात् तथा चप्रमत्वोपन्यासादिति न
नुदेतसमानाधिकरणयासंताभावव्याप्तिस्त्वतियोगितावच्छेदकान्यत्वमतिरिक्तसामान्याभावत्वहिं विलक्षणेद्रष्टव्य वक्ष्यमतिप्रयोगानामीतित्व
देर्यावदस्यावदि